# केन उपनिषद्
## kēna upaniṣad

ॐ आप्यायन्तु ममाङ्गानि वाक्प्राणश्चक्षुः श्रोत्रमथो बलमिन्द्रियाणि च सर्वाणि।
सर्वं ब्रह्मौपनिषदं माऽहं ब्रह्म निराकुर्यां मा मा ब्रह्म निराकरोदनिराकरणमस्त्वनिराकरणं मेऽस्तु।
तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु ।।
ॐ शान्तिः शान्तिः शान्तिः ।।

*OM āpyāyantu mamāṅgāni vākprāṇaścakṣuḥ śrōtramathō balamindriyāṇi ca sarvāṇi. sarvaṃ brahmaupaniṣadaṃ mā'haṃ brahma nirākuryāṃ mā mā brahma nirākarōd-anirākaraṇamastvanirākaraṇaṃ mē'stu. tadātmani niratē ya upaniṣatsu dharmāstē mayi santu tē mayi santu ..OM śāntiḥ śāntiḥ śāntiḥ..*

**Anvaya -** मम अङ्गानि वाक् प्राणः चक्षुः श्रोत्रम् अथ सर्वाणि इन्द्रियाणि च बलम् आप्यायन्तु । सर्वं ब्रह्म औपनिषदम् , अहं ब्रह्म मा निराकुर्याम् ब्रह्म मा मा निराकरोत् अनिराकरणम् अस्तु मे अनिराकरणम् अस्तु । ये धर्माः उपनिषत्सु [सन्ति] ते तदात्मनि निरते मयि सन्तु ते मयि सन्तु ।।

### प्रथमः खण्डः
### *prathamaḥ khaṇḍaḥ*

ॐ केनेषितं पतति प्रेषितं मनः केन प्राणः प्रथमः प्रैति युक्तः ।
केनेषितां वाचमिमां वदन्ति चक्षुः श्रोत्रं क उ देवो युनक्ति ।। १ ।।
*OM kēnēṣitaṃ patati prēṣitaṃ manaḥ kēna prāṇaḥ prathamaḥ praiti yuktaḥ .*
*kēnēṣitāṃ vācamimāṃ vadanti cakṣuḥ śrōtraṃ ka u dēvō yunakti .. 1 ..*

**Anvaya -** मनः केन इषितं प्रेषितम् पतति (स्वविषयम् प्रतिगच्छति)? प्रथमः प्राणः केन युक्तः (प्रेरितः सन् ) प्रैति? केन इषिताम् इमां वाचं (वाक् ) [लोकाः] वदन्ति? [तथा] क उ देवः चक्षुः श्रोत्रम् [च] युनक्ति?

श्रोत्रस्य श्रोत्रं मनसो मनो यद् वाचो ह वाचं स उ प्राणस्य प्राणः ।
चक्षुषश्चक्षुरतिमुच्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति ।। २ ।।
*śrōtrasya śrōtraṃ manasō manō yad vācō ha vācaṃ sa u prāṇasya prāṇaḥ .*
*cakṣuṣaścakṣuratimucya dhirāḥ prētyāsmāllōkādamṛtā bhavanti .. 2 ..*

**Anvaya -** यत् श्रोत्रस्य श्रोत्रम् मनसः मनः वाचः ह वाचं (वाक् ) , सः उ प्राणस्य प्राणः चक्षुषः चक्षुः , [एतत् विदित्वा] धीराः अतिमुच्य (श्रोत्रादिषु आत्मबुद्धिः परित्यज्य), अस्मात् लोकात् प्रेत्य (देहात्मभावात् मुक्ताः सन्तः) , अमृताः भवन्ति ।।

न तत्र चक्षुर्गच्छति न वाग्गच्छति नो मनः
न विद्मो न विजानीमो यथैतदनुशिष्यात् ।। ३ ।।
*na tatra cakṣurgacchati na vāggacchati nō manaḥ*
*na vidmō na vijānimō yathaitadanuśiṣyāt .. 3 ..*

**Anvaya -** तत्र चक्षुः न गच्छति , वाक् न गच्छति नो मनः ।
[वयं तत् ] न विद्मः यथा एतत् (ब्रह्म) अनुशिष्यात् (शिष्याय उपदिशेत्) [तदपि न विजानीमः ] ।।

अन्यदेव तद्विदितादथो अविदितादधि ।
इति शुश्रुम पूर्वेषां ये नस्तद्व्याचचक्षिरे ।। ४ ।।
*anyadēva tadviditādathō aviditādadhi .*
*iti śuśruma pūrvēṣāṃ yē nastadvyācacakṣirē .. 4 ..*
**Anvaya -** तत् (ब्रह्म) विदितात् अन्यत् एव अथ अविदितात् अधि । ये नः (अस्मभ्यम् ) तत् (ब्रह्मतत्त्वम् )
व्याचचक्षिरे (व्याख्यातवन्तः) [तेषां ] पूर्वेषाम् (आचार्याणाम् ) इति [वयं ] शुश्रुम ।।

यद्वाचाऽनभ्युदितं येन वागभ्युद्यते ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ।। ५ ।।
*yadvācā'nabhyuditaṃ yēna vāgabhyudyatē .*
*tadēva brahma tvaṃ viddhi nēdaṃ yadidamupāsatē .. 5 ..*
**Anvaya -** यत् वाचा अनभ्युदितम् (अप्रकाशितम् ) येन (ब्रह्मणा) वाक् अभ्युद्यते ,
तत् एव ब्रह्म त्वम् विद्धि , न इदम् यत् इदम् [उपाधि विशिष्टं ] [लोकाः ] उपासते ।।

यन्मनसा न मनुते येनाहुर्मनो मतम् ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ।। ६ ।।
*yanmanasā na manutē yēnāhurmanō matam .*
*tadēva brahma tvaṃ viddhi nēdaṃ yadidamupāsatē .. 6 ..*
**Anvaya -** [जनः] मनसा यत् न मनुते (संकल्पयति) , येन मनः मतम् [इति ब्रह्मविदः ]आहुः (वदन्ति) ,
तत् एव ब्रह्म त्वम् विद्धि , न इदम् यत् इदम् [उपाधि विशिष्टं] [लोकाः ] उपासते ।।

यच्चक्षुषा न पश्यति येन चक्षूंषि पश्यति ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ।। ७ ।।
*yaccakṣuṣā na paśyati yēna cakṣūṃṣi paśyati .*
*tadēva brahma tvaṃ viddhi nēdaṃ yadidamupāsatē .. 7 ..*
**Anvaya -** [जनः] चक्षुषा यत् न पश्यति , येन चक्षूंषि पश्यति ,
तत् एव ब्रह्म त्वम् विद्धि , न इदम् यत् इदम् [उपाधि विशिष्टं] [लोकाः ] उपासते ।।

यच्छ्रोत्रेण न शृणोति येन श्रोत्रमिदं श्रुतम् ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ।। ८ ।।
*yacchrōtrēṇa na śṛṇōti yēna śrōtramidaṃ śrutam .*
*tadēva brahma tvaṃ viddhi nēdaṃ yadidamupāsatē .. 8 ..*
**Anvaya -** [जनः] श्रोत्रेण यत् न शृणोति , येन इदम् श्रोत्रम् श्रुतम् ,
तत् एव ब्रह्म त्वम् विद्धि , न इदम् यत् इदम् [उपाधि विशिष्टं] [लोकाः ] उपासते ।।

यत्प्राणेन न प्राणिति येन प्राणः प्रणीयते ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ।। ९ ।।
*yatprāṇēna na prāṇiti yēna prāṇaḥ praṇīyatē .*
*tadēva brahma tvaṃ viddhi nēdaṃ yadidamupāsatē .. 9 ..*
**Anvaya -** [जनः] प्राणेन यत् न प्राणिति , येन प्राणः प्रणीयते ,
तत् एव ब्रह्म त्वम् विद्धि , न इदम् यत् इदम् [उपाधि विशिष्टं] [लोकाः ] उपासते ।।

**द्वितीयः खण्डः**
***dvitīyaḥ khaṇḍaḥ***

यदि मन्यसे सुवेदेति दभ्रमेवापि नूनं त्वं वेत्थ ब्रह्मणो रूपं ।
यदस्य त्वं यदस्य देवेष्वथ नु मीमांस्यमेव ते मन्ये विदितम् ।। १ ।।
*yadi manyasē suvēdēti dabhramēvāpi nūnaṃ tvaṃ vēttha brahmaṇō rūpaṃ .*
*yadasya tvaṃ yadasya dēvēṣvatha nu mīmāṃsyamēva tē manyē viditam .. 1 .*
**Anvaya –**
**Guru**: यदि [त्वं ] मन्यसे – "[अहं ब्रह्म] सुवेद " इति, नूनं त्वं ब्रह्मणः रूपं (स्वरूपं) दभ्रम् (अल्पम्) एव अपि वेत्थ । त्वं अस्य (ब्रह्मणः) यत् [रूपं भूतेषु] नु अस्य यत् [रूपं ] देवेषु [वेत्थ] – तत् दभ्रम् अपि। अथ ते विदितम् ब्रह्म मीमांस्यम् (विचार्यम्) एव [अहं ] मन्ये।।

नाहं मन्ये सुवेदेति नो न वेदेति वेद च ।
यो नस्तद्वेद तद्वेद नो न वेदेति वेद च ।। २ ।।
*nāhaṃ manyē suvēdēti nō na vēdēti vēda ca .*
*yō nastadvēda tadvēda nō na vēdēti vēda ca .. 2 ..*
**Anvaya –**
**Śiṣya**: अहं न मन्ये "[अहं ब्रह्म] सुवेद " इति । न उ " [अहं ] न वेद" इति । [अहं] वेद च । नः (अस्माकं मध्ये) यः तत् " नो न वेद, वेद च " इति वेद (वेत्ति), [सः ] तत् (ब्रह्म) वेद ।।

यस्यामतं तस्य मतं मतं यस्य न वेद सः ।
अविज्ञातं विजानतां विज्ञातमविजानताम् ।। ३ ।।
*yasyāmataṃ tasya mataṃ mataṃ yasya na vēda saḥ .*
*avijñātaṃ vijānatāṃ vijñātamavijānatām .. 3 ..*
**Anvaya –**
**Śruti**: यस्य [ब्रह्म] अमतम् (अविदितम्) तस्य मतम् (विदितम्) [भवति]। यस्य [ब्रह्म] मतम् सः न वेद। विजानताम् अविज्ञातम् , अविजानताम् विज्ञातम् ।।

प्रतिबोधविदितं मतममृतत्वं हि विन्दते ।
आत्मना विन्दते वीर्यं विद्यया विन्दतेऽमृतम् ।। ४ ।।
*pratibōdhaviditaṃ matamamṛtatvaṃ hi vindatē .*
*ātmanā vindatē vīryaṃ vidyayā vindatē'mṛtam .. 4 ..*
**Anvaya -** [ब्रह्म यदा ] प्रतिबोध विदितम् [भवति, तदा तत् ] मतम् [भवति]। [तस्मात् ] अमृतत्वं हि विन्दते । आत्मना (स्वस्वरूप साक्षात्कारेण) वीर्यं विन्दते , विद्यया (ब्रह्मविद्यया) अमृतम् विन्दते ।।

इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टिः ।
भूतेषु भूतेषु विचित्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति ।। ५ ।।
*iha cēdavēdīdatha satyamasti na cēdihāvēdīnmahatī vinaṣṭiḥ .*
*bhūtēṣu bhūtēṣu vicitya dhīrāḥ prētyāsmāllōkādamṛtā bhavanti .. 5 ..*

**Anvaya -** [मनुष्यः] इह (अस्मिन् देहे, अस्मिन् लोके) चेत् [तत् ब्रह्म] अवेदीत् , अथ (तदा) सत्यम् अस्ति (जीवितस्य परमार्थता भवति)। इह चेत् [तत् ब्रह्म] न अवेदीत् , [तदा तस्य] महती विनष्टिः [भवति] । धीराः भूतेषु भूतेषु [एकं आत्मतत्त्वं] विचित्य (साक्षात्कृत्य) अस्मात् लोकात् प्रेत्य (देहात्मभावात् मुक्ताः सन्तः) अमृताः भवन्ति ।।

**तृतीयः खण्डः**

***tṛtīyaḥ khaṇḍaḥ***

ब्रह्म ह देवेभ्यो विजिग्ये , तस्य ह ब्रह्मणो विजये देवा अमहीयन्त ।
त ऐक्षन्तास्माकमेवायं विजयोऽस्माकमेवायं महिमेति ।। १ ।।

*brahma ha dēvēbhyō vijigyē , tasya ha brahmaṇō vijayē dēvā amahīyanta .*
*ta aikṣantāsmākamēvāyaṃ vijayō'smākamēvāyaṃ mahimēti .. 1 ..*

**Anvaya -** ब्रह्म ह देवेभ्यः विजिग्ये , तस्य ब्रह्मणः विजये देवाः अमहीयन्त ह ।
ते ऐक्षन्त – अयं विजयः अस्माकम् एव , अस्माकम् एव अयं महिमा इति ।।

तद्धैषां विजज्ञौ , तेभ्यो ह प्रादुर्बभूव।
तन्न व्यजानत किमिदं यक्षमिति ।। २।।

*taddhaiṣāṃ vijajñau , tēbhyō ha prādurbabhūva.*
*tanna vyajānata kimidaṃ yakṣamiti .. 2..*

**Anvaya -** [ब्रह्म] ह एषां तत् [अहंकारं ] विजज्ञा ; तेभ्यः [सः] प्रादुर्बभूव ।
तत् [प्रादुर्भूतम्] इदम् यक्षं किम् इति [ते देवाः] न व्यजानत ।।

तेऽग्निमब्रुवन् , जातवेद , एतद् विजानीहि ; किमेतद् यक्षमिति ; तथेति ।। ३ ।।

*tē'gnimabruvan , jātavēda , ētad vijānīhi ; kimētad yakṣamiti ; tathēti .. 3 ..*

**Anvaya -** ते अग्निम् अब्रुवन् – " हे जातवेद, किम् एतत् यक्षम् – एतत् विजानीहि " – इति ।
[अग्निः अब्रुवन् ] – " तथा इति " ।।

तदभ्यद्रवत् , तमभ्यवदत् कोऽसीति , अग्निर्वा अहमस्मीत्यब्रवीत् –
जातवेदा वा अहमस्मीति ।। ४।।

*tadabhyadravat , tamabhyavadat kō'sīti , agnirvā ahamasmītyabravīt -*
*jātavēdā vā ahamasmīti .. 4..*

**Anvaya -** [अग्निः] तत् [यक्षं] अभ्यद्रवत् ; [तदा यक्षः] तम् अभ्यवदत् – " कः असि " इति ।
" अहं अग्निः वै अस्मि इति, जातवेदाः वै अहं अस्मि " – इति [अग्निः ] अब्रवीत् ।।

तस्मिँस्त्वयि किं वीर्यमिति-अपीदं , सर्वं दहेयं यदिदं पृथिव्यामिति ।। ५ ।।

*tasminstvayi kiṃ vīryamiti - apidaṃ , sarvaṃ dahēyaṃ yadidaṃ pṛthivyāmiti .. 5 ..*

**Anvaya -** “ तस्मिन् त्वयि किं वीर्यं ” – इति [यक्षः अपृच्छन् ] ।
“ इदं पृथिव्याम् यत् इदं सर्वं अपि दहेयं ” – इति [अग्निः प्रत्यब्रवीत् ] ।।

तस्मै तृणं निदधावेतद् दहेति , तदुपप्रेयाय ; सर्वजवेन तन्न शशाक दग्धुं ;
स तत एव निववृते , नैतदशकं विज्ञातुं यदेतद् यक्षमिति ।।६।।

*tasmai tṛṇaṃ nidadhāvētad dahēti , tadupaprēyāya ; sarvajavēna tanna śaśāka dagdhuṃ ; sa tata ēva nivavṛtē , naitadaśakaṃ vijñātuṃ yadētad yakṣamiti ..6..*

**Anvaya -** “ एतत् दह ” – इति [उक्त्वा] [यक्षः] तस्मै तृणं निदधौ । [अग्निः] सर्वजवेन तत् [तृणं ] उपप्रेयाय [परन्तु ] तत् दग्धुं न शशाक । [अतः ] सः ततः एव निववृते, यत् एतत् यक्षं एतत् विज्ञातुं न अशकम् – इति [देवेभ्यः अब्रवीत् ] ।।

अथ वायुमब्रुवन् , वायवेतद् विजानीहि , किमेतद् यक्षमिति ; तथेति ।। ७ ।।

*atha vāyumabruvan , vāyavētad vijānīhi , kimētad yakṣamiti ; tathēti .. 7 ..*

**Anvaya -** अथ [देवाः] वायुम् अब्रुवन् – “ हे वायो, किम् एतत् यक्षम् – एतत् विजानीहि ” – इति ।
[वायुः अब्रुवन् ] – “ तथा इति ” ।।

तदभ्यद्रवत् , तमभ्यवदत् कोऽसीति ; वायुर्वा
अहमस्मीत्यब्रवीत् , मातरिश्वा वा अहमस्मीति ।। ८।।

*tadabhyadravat , tamabhyavadat kō'sīti ; vāyurvā ahamasmītyabravīt , mātariśvā vā ahamasmīti .. 8..*

**Anvaya -** [वायुः] तत् [यक्षं ] अभ्यद्रवत् ; [तदा यक्षः] तम् अभ्यवदत् – “ कः असि इति ” ।
“ अहं वायुः वै अस्मि इति , मातरिश्वा वै अहं अस्मि ” – इति [वायुः ] अब्रवीत् ।।

तस्मिँस्त्वयि किं वीर्यमिति-अपीदं , सर्वमाददीय यदिदं पृथिव्यामिति ।। ९ ।।

*tasminstvayi kiṃ vīryamiti-apīdaṃ , sarvamādadīya yadidaṃ pṛthivyāmiti .. 9 ..*

**Anvaya -** “ तस्मिन् त्वयि किं वीर्यं ” – इति [यक्षः अपृच्छन् ] ।
“ इदं पृथिव्याम् यत् इदं सर्वं अपि आददीय ” – इति [वायुः प्रत्यब्रवीत् ] ।।

तस्मै तृणं निदधावेतदादत्स्वेति ; तदुपप्रेयाय ; सर्वजवेन ;
तन्न शशाकादातुं ; स तत एव निववृते ; नैतदशकं विज्ञातुं यदेतद् यक्षमिति।।१०।।

*tasmai tṛṇaṃ nidadhāvētadādatsvēti ; tadupaprēyāya ; sarvajavēna ; tanna śaśākādātuṃ ; sa tata ēva nivavṛtē ; naitadaśakaṃ vijñātuṃ yadētad yakṣamiti..10..*

**Anvaya -** " एतत् आदत्स्व " – इति [उक्त्वा] [यक्षः] तस्मै तृणं निदधौ । [वायुः] सर्वजवेन तत् [तृणं ] उपप्रेयाय [परन्तु] तत् आदातुं न शशाक । [अतः] सः ततः एव निववृते, यत् एतत् यक्षं एतत् विज्ञातुं न अशकम् इति [देवेभ्यः अब्रवीत् ] ।।

अथेन्द्रमब्रुवन् , मघवन्नेतद् विजानीहि , किमेतद् यक्षमिति ;
तथेति ; तदभ्यद्रवत् ; तस्मात् तिरोदधे ।। ११ ।।

*athēndramabruvan , maghavannētad vijānīhi , kimētad yakṣamiti ;*
*tathēti ; tadabhyadravat ; tasmāt tirōdadhē.. 11 ..*

**Anvaya -** अथ [देवाः] इन्द्रम् अब्रुवन् – " हे मघवन्, किम् एतत् यक्षं – एतत् विजानीहि " – इति ।
[इन्द्रः अब्रुवन् ] – " तथा इति " । [इन्द्रः] तत् [यक्षं ] अभ्यद्रवत् [परन्तु ] [यक्षं ] तस्मात् तिरोदधे ।।

स तस्मिन्नेवाकाशे स्त्रियमाजगाम बहुशोभमानामुमां हैमवतीं ;
तां होवाच , किमेतद् यक्षमिति ।। १२ ।।

*sa tasminnēvākāśē striyamājagāma bahuśōbhamānāmumāṃ haimavatīṃ ;*
*tāṃ hōvāca , kimētad yakṣamiti.. 12 ..*

**Anvaya -** सः (इन्द्रः) तस्मिन् एव आकाशे बहुशोभमानाम् स्त्रियम् आजगाम । इन्द्रः तां हैमवतीं उमाम् उवाच ह –
" किम् एतत् यक्षम् इति " ।।

**चतुर्थः खण्डः *caturthaḥ khaṇḍaḥ***

सा ब्रह्मेति होवाच ; ब्रह्मणो वा एतद्विजये महीयध्वमिति ; ततो हैव विदांचकार ब्रह्मेति ।। १ ।।
*sā brahmēti hōvāca ; brahmaṇō vā ētadvijayē mahīyadhvamiti ;*
*tatō haiva vidāñcakāra brahmēti .. 1 ..*

**Anvaya -** सा उवाच ह – एतत् ब्रह्म इति ।
ब्रह्मणः वै विजये [यूयम् ] एतत् महीयध्वम् इति । ततः ह एव [इन्द्रः] विदांचकार [एतत् ] ब्रह्म इति।।

तस्माद् वा एते देवा अतितरामिवान्यान् देवान् , यदग्निर्वायुरिन्द्रस्ते
ह्येनन्नेदिष्ठं पस्पर्शुस्ते ह्येनत् प्रथमो विदांचकार ब्रह्मेति ।। २ ।।

*tasmād vā ētē dēvā atitarāmivānyān dēvān , yadagnirvāyurindrastē*
*hyēnannēdiṣṭhaṃ pasparśustē hyēnat prathamō vidāñcakāra brahmēti .. 2 ..*

**Anvaya -** यत् (यस्मात् ) एते देवाः – इन्द्रः अग्निः वायुः – एनत् [ब्रह्म] हि नेदिष्ठं पस्पर्शुः ,
ते हि प्रथमः एनत् [यक्षम् ] ब्रह्मः इति विदांचकार । तस्मात् वै ते अन्यान् देवान् अतितराम् इव ।।

तस्माद् वा इन्द्रोऽतितरामिवान्यान् देवान् ; स ह्येनन्नेदिष्ठं पस्पर्श , स ह्येनत् प्रथमो विदांचकार ब्रह्मेति ।। ३ ।।
*tasmād vā indrō'titarāmivānyān dēvān ; sa hyēnannēdiṣṭhaṃ pasparśa , sa hyēnat prathamō vidāñcakāra brahmēti .. 3 ..*

**Anvaya -** सः (इन्द्रः) हि एनत् [ब्रह्म] नेदिष्ठं पस्पर्श ; [तथा] सः हि प्रथमः एनत् [यक्षम् ] ब्रह्म इति विदांचकार,
तस्मात् वै इन्द्रः अन्यान् देवान् अतितराम् इव ।।

तस्यैष आदेशो - यदेतद् विद्युतो व्यद्युतदा , इतीन्न्यमीमिषदा , इत्यधिदैवतम् ।। ४ ।।

*tasyaiṣa ādēśō - yadētad vidyutō vyadyutadā , itīnnyamīmiṣadā , ityadhidaivatam .. 4 ..*

**Anvaya -** तस्य एषः आदेशः –

यत् एतत् विद्युतः व्यद्युतत् आ (इव) इति , [यत् च चक्षुः] न्यमीमिषत् आ इत् (च),
इति अधिदैवतम् ।।

अथाध्यात्मम् - यदेतद् गच्छतीव च मनोऽनेन चैतदुपस्मरत्यभीक्ष्णं संकल्पः ।। ५ ।।
*athādhyātmaṃ - yadētad gacchatīva ca manō'nēna caitadupasmaratyabhīkṣṇaṃ saṅkalpaḥ .. 5 ..*

**Anvaya -** अथ अध्यात्मम् –

यत् मनः एतत् गच्छति इव च , [साधकः] अनेन (मनसा) एतत् अभीक्ष्णम् च उपस्मरति ।

[एषः एव] संकल्पः (ब्रह्मविषये मानसचिन्ता) ।।

तद्ध तद्वनं नाम तद्वनमित्युपासितव्यं ; स य एतदेवं वेद , अभि-हैनं सर्वाणि भूतानि संवाञ्छन्ति ।। ६ ।।

*taddha tadvanaṃ nāma tadvanamityupāsitavyaṃ ;*

*sa ya ētadēvaṃ vēda , abhi-hainaṃ sarvāṇi bhūtāni saṃvāñchanti .. 6 ..*

**Anvaya -** तत् ह तद्वनम् नाम, [तस्मात् ब्रह्म] तद्वनम् इति उपासितव्यम् ।

सः यः एतत् [ब्रह्म] एवं वेद , एनम् ह सर्वाणि भूतानि अभिसंवाञ्छन्ति ।।

उपनिषदं भो ब्रूहीत्युक्ता त उपनिषद् ; ब्राह्मीं वाव त उपनिषदमब्रूमेति ।। ७ ।।

*upaniṣadaṃ bhō brūhītyuktā ta upaniṣad ; brāhmīṃ vāva ta upaniṣadamabrūmēti .. 7 ..*

**Anvaya –**

**Disciple** – भोः उपनिषदं ब्रूहि इति ।

**Guru** – ते (तुभ्यम्) उपनिषत् उक्ता ; ब्राह्मीम् उपनिषदं वाव ते अब्रूम इति ।।

तस्यै तपो दमः कर्मेति प्रतिष्ठा , वेदाः सर्वाङ्गानि सत्यमायतनम् ।। ८ ।।

*tasyai tapō damaḥ karmēti pratiṣṭhā , vēdāḥ sarvāṅgāni satyamāyatanam .. 8 ..*

**Anvaya -** तपः दमः कर्म – इति तस्यै (तस्याः) प्रतिष्ठा , वेदाः सर्वाङ्गानि सत्यम् आयतनम् ।।

यो वा एतामेवं वेदापहत्य पाप्मानमनन्ते स्वर्गे लोके ज्येये प्रतितिष्ठति प्रतितिष्ठति ।। ९ ।।
*yō vā ētāmēvaṃ vēdāpahatya pāpmānamanantē svargē lōkē jyēyē pratitiṣṭhati pratitiṣṭhati .. 9 ..*

**Anvaya -** यः वै एताम् [उपनिषदं] एवं वेद , [सः] पाप्मानम् अपहत्य अनन्ते ज्येये स्वर्गे लोके
प्रतितिष्ठति प्रतितिष्ठति ।।